साहित्य शास्त्री I

शिशुपालवधम् श्लोकव्याख्या ।

जाज्वल्यमाना जगत: शान्तये समुपेयुषी ।
व्यद्योतिष्ट सभावेद्यामसौ नरशिखित्रयी ।

श्लोकोऽयं महाकविमाघप्रणीतस्य शिशुपालवध-महाकाव्यस्य द्वितीयसर्गात् उद्धृत: अस्ति ।

मुनि: नारद: भगवन्तं श्रीकृष्णं शिशुपालवधार्थं इन्द्रसन्देशमुक्त्वा स्वर्गं प्रस्थिते सति । श्रीकृष्ण: शिशुपालं प्रति क्रोधं दर्शयति । पश्चात् श्रीकृष्ण: विचार-विमर्शं कर्तुं उद्धवबलरामाभ्यां सह सभाभवनं आगच्छति ।

अत्र कवि: श्रीकृष्णबलरामोद्धवानामग्नित्रयसाम्यं वर्णयति । जगत्यस्मिन् उपद्रवाणां शान्तये मिलिता भृशं ज्वलन्ती एषा श्रीकृष्णबलरामोद्धव पुरुषपावकत्रयी सभामण्डपे शुशुभे ।

अन्वय: - जगत: शान्तये समुपेयुषी जाज्वल्यमाना असौ नरशिखित्रयी सभावेद्यां व्यद्योतिष्ट ।

व्याख्या - जगत: = संसारस्य । शान्तये = मङ्गलाय । समुपेयुषी = मिलिता । जाज्वल्यमाना = भृशं ज्वलन्ती । असौ = एषा । व्यद्योतिष्ट = दीप्यते स्म ।

समास: - नरशिखित्रयी - त्रय: अवयवा यस्या: सा त्रयी, नरा एव शिखिन: नरशिखिन:, तेषां त्रयी नरशिखित्रयी ।

सभावेदि - सभैव वेदि:, तस्यां सभावेद्याम् ।

अलङ्कार: → रूपकम् । तद्रूपकमभेदो य: उपमानोपमेययो: ।

छन्द: - अनुष्टुप् ।

13-06-2020

डॉ० निर्मल कुमार झा, स० प्राचार्य ।
राधा-उमाकान्त सं० महावि० सुरखेना,
पूर्णियाँ ।

13-06-2021

साहित्यम् (प्रतिष्ठा), शास्त्री - III

अष्टम् पत्रम् । मालविकाग्निमित्रे श्लोकव्याख्या ।

"प्रतिपक्षेणापि पतिं सेवन्ते भर्तृवत्सलाः साध्व्यः ।
अन्यसरितामपि जलं समुद्रगाः प्रापयन्त्युदधिम् ॥"

प्रसङ्गादि पूर्ववत् ।

नाटकान्ते देवी धारिणी, या राज्ञः अग्निमित्रस्य राजमहिषी आसीत्, सा मालविकाम् अवगुण्ठनवतीं कृत्वा राज्ञे अग्निमित्राय ददाति । राजा मालविकां पत्नीरूपेण स्वीकरोति । ततः परिव्राजिका देव्याः धारण्याः प्रशंसां करोति —

अन्वयः → भर्तृवत्सलाः साध्व्यः प्रतिपक्षेण अपि पतिं सेवन्ते । समुद्रगाः अन्यसरितां जलं हि अब्धिं प्रापयन्ति ।

शब्दार्थाः व्याकरणानि च → भर्तृवत्सलाः = स्वकीये पत्यौ अनुरक्ताः । साध्व्यः = साधुवृत्ताः स्त्रियः । प्रतिपक्षेण = विपक्षेण, सपत्न्या । पतिम् = भर्तारम् । सेवन्ते = प्रसन्नं कर्तुं यतन्ते । समुद्रगाः = महानद्यः, समुद्रपर्यन्तगामिन्यो गङ्गाद्यः महानद्यः । अन्यसरिताम् → अन्याश्च ताः सरितः तासाम् = अपरासां लघुनदीनाम् । जलम् = पयः । अब्धिम् = समुद्रम् । प्रापयन्ति = गमयन्ति ।

अलङ्कारः → अस्मिन् श्लोके अर्थान्तरन्यासः तथा च समासोक्तिः तयोः सङ्करः ।

छन्दः → आर्या ।

अर्थान्तरादि अलङ्कारस्य तथा च आर्याछन्दस्य लक्षणं मया अन्य श्लोके पूर्वे प्रदत्तम् ।

13-06-21

डॉ० निर्मल कुमार झा, स० प्राचार्यः ।
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ ।

अनिवार्य पत्रम्
व्याकरणछात्रहेतवे

शास्त्री II

13-08-2021

रघुवंशम् । श्लोकव्याख्या ।

"प्रलोभिताप्याकृतिलोभनीया विदर्भराजावरजा तथैवम् ।
तस्मादपावर्तत दूरकृष्टा नीत्येव लक्ष्मीः प्रतिकूलदैवात् ॥"

सन्दर्भः → पूर्ववत् ।

प्रसङ्गः → कविरत्र हेमाङ्गदं राजानं प्रति इन्दुमत्याः निःस्पृहदृष्टिविशेषं सोपमं वर्णयति ।

अन्वयः → आकृतिलोभनीया विदर्भराजावरजा तथा एवं प्रलोभिता अपि नीत्या दूरकृष्टा लक्ष्मीः प्रतिकूलदैवात् जनात् इव तस्मात् अपावर्तत ।

व्याख्या → आकृतिलोभनीया → स्वरूपाकर्षणीया । विदर्भराजावरजा → विदर्भराजस्य अवरं जाता या सा = इन्दुमती । तथा = सुनन्दया । एवम् = इत्थम् । प्रलोभिताऽपि = प्रेरितापि । नीत्या = पुरुषकारेण । दैवेन । दूरकृष्टा = दूरमानीता । लक्ष्मीः = श्रीः । प्रतिकूलदैवात् → प्रतिकूलं दैवं यस्य सः = विपरीतभाग्यात् । जनात् = व्यक्तेः । इव = यथा । तस्मात् = हेमाङ्गदात् । अपावर्तत = प्रतिनिवृत्ता ।

तात्पर्यः → इन्दुमती हेमाङ्गदं परित्यज्य तथैव पुरो गता, यथा विरुद्धभाग्यात् पुरुषार्थकारकं पुरुषं परित्यज्य लक्ष्मीः प्रयाति ।

विशेषः → अस्मिन् श्लोके शृङ्गार रसः, वैदर्भीरीतिः, प्रसादगुणः, उपमालङ्कारः, उपजातिवृत्तिश्च ।

13-08-2021

डॉ॰ निर्मलकुमार झा, (सं॰ प्राचार्यः)।
रा॰उ॰ सं॰महावि॰ सुखसेना, पूर्णियाँ ।

13-06-2021

संस्कृतसामान्यम् । उपशास्त्री-I

अनिवार्यपत्रम् । हितोपदेशः । श्लोकव्याख्या ।

"दुर्जनः परिहर्तव्यो विद्ययाऽलङ्कृतोऽपि सन् ।
मणिना भूषितः सर्पः किमसौ न भयङ्करः ॥"

सन्दर्भः → प्रस्तुतोऽयं श्लोकः महाकविश्रीनारायणपण्डितेन विरचितस्य हितोपदेशग्रन्थात् मित्रलाभात् भागात् गृहीतोऽस्ति ।

अन्वयः → विद्यया अलङ्कृतः अपि (सन्) दुर्जनः परिहर्तव्यः (यतो हि) मणिना भूषितः असौ सर्पः किम् भयङ्करः न (भवति) ।

शब्दार्थः व्याकरणञ्च → विद्यया = ज्ञानेन । अलङ्कृतः → अलम् + √कृ + क्त = भूषितः । अपि = एवम्, पुनश्च । दुर्जनः = दुष्टः नरः । परिहर्तव्यः → परि + √हृ + तव्यत् = त्यक्तुं शक्यते । मणिना = बहुमूल्यप्रस्तरखण्डेन, रत्नेन वा । भूषितः → √भूष् + क्त = सज्जितः, सुसज्जितः । किम् = कथं । असौ - अयम् । न = नहि । भयङ्करः → भयं करोति इति, उपपद समासः । भय + √कृ + घञ् (भावे) = भयङ्करः ।

आशयः → विद्यावान् किन्तु दुष्टजनः त्यजनीयः भवति यतोहि मणिरत्नयुक्तः भयोत्पादकः सर्पः जनानां प्राणघातकः भवति ।

अस्मिन् श्लोके अनुष्टुप् छन्दः, वैदर्भीरीतिः, दृष्टान्तालङ्कारः, प्रसादगुणश्चास्ति ।

(signature) 13-06-2021

डॉ० निर्मल कुमार झा, (स० प्राचार्य)
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ